[illegible]

[illegible]

[illegible]

[illegible]

[illegible]



ಅರುಣಾಚಲ ನಿವಾಸಿ ಶ್ರೀರಮಣಮಹರ್ಷಿ

।। ॐ ।।

।।अथमाधुच्छंदसाग्नेयसूक्तभाष्यं।।

अथातोवैश्वामित्रस्यमधुच्छंदसआर्षंगायत्रमाग्नेयंसूक्तंव्याख्यास्यामः।। तत्रनवर्चोभवंति।।तासुद्दयमाद्यभवति।।

।१। ऋ॰ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं।।
होतारंरत्नधातमं।।

भा॰ पुरोहितमाहवनीयात्मना पूर्वस्यांदिशिहितमितियास्कः।। पुरोहितवत्कार्यसंपादकमितिसायनः।।देवानांपुरःसरत्वात्पुरोहितमितिपरे।। अग्नेर्वयंप्रथमस्यामृतानामित्यन्यत्रनिगमश्चभवति।। पूर्वयोर्मतयोर्यज्ञस्येतिसंबंधः।। उत्तरस्मिन्मतेयज्ञस्येत्यस्यदेवमित्यनेनसंबंधः।।देवमभिमानिनंपुरुषविधं।।देवाःपितरोमनुष्याइतिपुरुषविधाएवद्विव्यवह्रियंते।। एतेनाचेतनस्तुतिवैयर्थ्यशंकावारिता।। तेजोदेवएवसन्यज्ञस्यचदेवोभवतिप्रथमः।।नपुनर्यज्ञस्यैव।।अपितुवाचइत्यप्याह।।ऋत्विजंहोतारंवागात्मकत्वात्सर्वेषांचदेवानांह्वातारमृत्विजं।।होतॄणामृत्विजांलोकेनदेहसंबंधाद्धोतृत्वं।।अपितुवागद्वारैव।।सचवाग
रूपेतिसर्वत्राग्निरेवहोताबोद्धव्यइत्युक्तंभ

गभूत्वा मुखं प्राविशदित्यादौ न ब्राह्मणो न
नि ॥ अंतर्यागे वा होतारं नामर्त्विजं वागात्मकत्वा
वाग्घोतेति ब्राह्मणमत्र भवति ॥ रत्नधातमम तिशयेन रत्नानां श्रे
ष्ठवस्तूनामुपासकेभ्यो दयानां धारयितारं ॥ अग्निं ॥ ईळे स्तौमि ॥
होत्रा प्रयोज्यत्वान्मंत्रस्य होता मंत्रकर्तेति सायनः ॥ नैषा युक्तिः ॥
न केवलं होत्रा प्रयोज्योयं मंत्रः ॥ अध्येत्रा च ब्रह्मयज्ञेषु युक्तो
भवति ॥ उपासकेनापि जपे प्रयुक्तो भवति ॥ ऋषिरेव क
र्तेति युक्तं भवति ॥ तस्य हि मंत्रो वाक्यं भवति ॥ यस्य वाक्यं
स ऋषिरिति कात्यायनः ॥ कोयमग्निर्नाम ॥ यदि केवलं
यज्ञवान्योरभिमानी देवः ॥ तदा त्वेइद्धूयते हविरिति न संग
च्छते ॥ तस्मात्तेजश्च पार्थिवं स भवति ॥ ननु पार्थिवस्य ज्यो
तिषो हव्यवाहनत्वाध्यज्ञाभिमानित्वमुपपद्यतां ॥ वागभि
मानित्वं कस्मात् संबंधात् ॥ तेजोमयी वागिति चेदितरयोश्च ज्यो
तिषोरिह भागः ॥ तेजस्त्वाविशेषात् ॥ अविशेषात्तेज एवाग्नि
र्भवतु ॥ वायोरग्निः ॥ अग्नेरापइत्यादौ सामान्यतस्तेजः
परमेवाग्निपदं पश्यामइति चेदिदं सिध्यति ॥ अन्यत्र तु दोषः ॥
आग्नेयेषु सूर्येंद्रयोश्च भागः स्यादिति चेत् ॥ पार्थिवमेव
ज्योतिर्भवतु प्रकृतोऽग्निः ॥ वयं न वदामो वाक्सामान्यस्या
ग्निर्दैवतमिति ॥ वाक् चतुष्प्रकारा दृश्यते ॥ परा पश्यंती म-
ध्यमा वैखरी चेति ॥ तत्र परस्यास्तु दैवतं परमेवाविकृतं सत्

दवाच्यंतेजः॥ पश्यंत्या आदित्यः॥ मध्यमायामाध्यमिकंते
जः॥ वैखर्या अयमेवाग्निः॥ उपपद्यतेचवैखरीरूपस्यहो
तृत्वं॥ अथयज्ञस्यपार्थिवेनज्योतिषासंबंधः प्रत्यक्षः॥
पार्थिवस्यज्योतिषोवाचश्चदेवतयासहकीदृशः संबंध
इतिमीमांसा॥ स्वस्वामिभावसंबंधेतादात्म्यानुपपत्तिः॥
नचांगांगिभावसंबंधः॥ स्थानभेदात॥ नापिस्वरूपसंबं
धः॥ भूतेंद्रियदेवतात्मनां सुतरांभेदात॥ अस्तुस्वरूपसंबं
धएव॥ ननूक्तंभूतेंद्रियदेवतात्मनां सुतरांभेदान्नेति॥
अविद्ययैवतान भेदोभासते॥ शरीरंतेजएवशब्दायमानं
वाग्भवति॥ शरीरं पृथिवीतोनातिरिच्यते॥ नन्वस्तुभूतें
द्रिययोरेकंतत्वं॥ देवतात्माकथंपार्थिवोऽग्निः॥ उच्यते॥
यथापृथिव्याः सारः शरीरं॥ तथाशरीरस्यसारोहृदयं॥
अन्नेयमुपनिषद्भवति॥ "यावैसापृथिवी॥ इयंवावसा
यदिदमस्मिन्पुरुषेशरीरं॥ अस्मिन्हीमेप्राणाः प्रतिष्ठि
ताएतंदेवानातिशीयंते॥ यद्वैतत्पुरुषेशरीरं॥ इदंवाव
तद्यदिदमस्मिन्नंतः पुरुषेहृदयं॥ अस्मिन्हीमेप्राणाः प्र
तिष्ठिताएतदेवानातिशीयंते" इति॥ हृदयाग्नेरस्मदं
तर्यामिनोदेवतात्माप्रथमोनान्यः॥ सोऽभिमानिनोविष
यिणोविज्ञानात्मनः स्वरूपंभवतीतिकथित
त्माभवतीत्यन्ये॥ भयंचतात्पर्यंतत्वं॥

वेदांताःकथयंति ॥ सएववैश्वानरः ॥ कथं

तिचेत् ॥ परस्माद्व्यतिरिक्तत्वात् ॥ "नतंविदाथयइमाजजा

नान्यद्युष्माकमंतरंबभूव" इत्यन्यत्रनिगमश्चास्मिन्विष

येभवति ॥ कथंतस्यपुरुषविधत्वमितिचेत् ॥ ससूक्ष्मः

पुरुषविधएव ॥ अंगुष्ठमात्रः पुरुषोंतरात्मासदाजनानां

हृदयेसंनिविष्टइत्याहुः ॥ सर्वस्यापिप्रथमोपासकस्य ॥

स्वांतर्यामितएवानुग्रहइत्युक्तंभवति ॥ सत्याभिमानिनंभे

दद्दृष्ट्युपरंजितमुपासकमन्यइवानुगृह्णाति ॥ सएव

ज्ञानिनोस्वात्मत्वेनानुभूयंते ॥ विज्ञानस्यहिसआत्मा ॥ त

न्मूलत्वात्तस्य ॥ तत्रैवोपरतत्वाच्च ॥ इममेवार्थंभगवानु

द्दालकःपुत्रायोपदिदेश ॥ "तत्त्वमसी"तितमेवाग्निविभू

तिंभगवंतंप्रथममृषयस्त्रिभिर्नामभिरभिष्टुवंति ॥ तान्ये

तानिभवंति ॥ अग्निर्जातवेदावैश्वानरइति ॥ भूतमग्नीरूढः ॥

इंद्रियंजातवेदाः ॥ वाच्याद्धिसर्वाणिज्ञानानिजायंते ॥ अंत

र्यामीवैश्वानरः ॥ विश्वेषांहिनराणामेषोंतरः ॥ स्तुति

ष्वभेदादेकैकमपिनामसर्वगुणमुपपद्यते ॥ १ ॥

॥ अथेयंद्वितीयाभवति ॥

२ ॠ ॥ अग्निः पूर्वेभिर्ऋषिभिरीड्योनूतनैरुत ॥

सदेवाँएहवंक्षति ॥

भा॥ पूर्वेभिः पुरातनैः॥ नूतनैरुतनवीनैश्च॥ ऋषिभिर्मंत्र
द्रष्टृभिः॥ ईड्यईडितुं शक्यः॥ सोग्निः॥ देवान्॥ इहकर्मणि
आवक्षत्यावहतु॥ देवानामावहनंहोतृत्वेनव्याख्यातं॥ ऋषि
भिरित्यनेनैतदाह॥ नानृषिर्यथावद्भगवंतंस्तोतुंशक्नुया
दिति॥ नूतनैरुतेत्यनेनैतदाह॥ नर्षित्वंकालसापेक्षमि
ति॥ २॥ ॥ अथेयंतृतीया भवति॥

३ ऋ॥ अग्निनारयिमश्नवत्पोषमेवदिवेदिवे॥
यशसंवीरवत्तमम॥

भा॥ अग्निना सुहुतेन सूपासितेनवासाधनभूतेन॥ दि
वेदिवे दिनेदिने॥ पोषमेववर्धमानमेव॥ यशसंयशो
युक्तंपात्रेषुविनियोज्यत्वात्॥ वीरवत्तममतिशयेनवीर
पुरुषोपेतं॥ अत्रवीराश्चवीरत्वगुणयुक्ताःपुरुषाःपु
त्रपौत्रादयोविवक्ष्यंते॥ भोगेनसूपयोगेनचतैर्धनेनसंबध्यं
ते॥ इदंवीरत्वंयदविच्छिन्नाग्नित्वं॥ नचनास्तितस्यपदस्य
विक्रांतत्वमर्थः॥ रयिंधनं॥ अश्नवत्प्राप्नोति॥ आराधक
इतिशेषः॥ किमग्न्याराधनस्यपुरुषनिर्व्यपेक्षमपूर्वजन
नद्वाराफलदातृत्वं॥ आहोस्विदाराधनतुष्टात्पुरुष [illegible]
संशयः॥ तत्रप्रथमंपक्षंजैमिनीयाःश्रयंते [illegible]

यणीयाः ॥ उभयंचविधयाकयाचेदीविप्रति[illegible]

सिद्धः ॥ नकर्माणिकर्माणि फलंदातुंपुरुषोऽव्यापृत । सर्वो[illegible]

अस्यकर्मण एतत्फलमितिकांश्चिन्नियतनियतिमेवकृतवानि

ति विभ्रमः ॥ लौकिकान्यपिकर्माणिनियतफलानिदृश्यंते ॥

एवमेववैदिकान्यपिकर्माणिभवितुमर्हंति ॥ नियतिकारकत्वा

त्पुरुषात्फलोपपत्तिः ॥ साक्षात्कर्मतः ॥ नियतिबलजन्याफल

दातृत्वशक्तिरेवकर्माणिध्वस्तेप्य[illegible]ध्वस्तामीमांसकैरपूर्वसं

ज्ञयाव्यवह्रियते ॥ किंसूर्यमंडलांतर्वर्ती पुरुषः कर्मफलानांनि

यतिंकृतवान् ॥ उताहोवैश्वानरः ॥ पूर्वएवभवतु ॥ ननूक्तंसचा

भिमानिनं भेददृष्ट्युपरंजितमुपासकमन्यइवानुगृह्णाति ॥ इ

ति ॥ नायंविरोधः ॥ नियतिवादोस्माकंप्रायोवादः ॥ नास्मा

भिरुच्यतेसर्वथाप्यनुग्राहकउत्तमइति ॥ अपितुविहितक

र्मफलनियतकारकएवेत्युक्तं ॥ उपासनातिशयादितएवा

नुग्रहः स्यात ॥ नतत्र नियत्यपेक्षा ॥ ३ ॥

॥ अथेयंचतुर्थीभवति ॥

४ ऋ॥ अग्नेयंयज्ञमध्वरंविश्वतःपरिभूरसि ॥

सइद्देवेषुगच्छति ॥

भा ॥ हे अग्ने ॥ यम ॥ अध्वरंहिंसारहितं ॥ यज्ञं ॥ विश्वतः ॥ स

र्वतः ॥ परिभूः व्याप्तः ॥ असि ॥ सइत्सएवयज्ञः ॥ देवेषु

गच्छति ॥ नान्यइत्यर्थोस्सिध्यति ॥ भूतात्मनावेदिंव्याप्तः ॥

ऋत्विजो वागात्मना॥ वैश्वानरात्मना च यजमानस्य हृदयं॥
इदंत्रयंचयोवेदतस्यैवयज्ञंप्रथमोविश्वतोव्याप्तोभवति॥
योनवेदतस्ययज्ञंव्याप्नुवंत्यव्याप्तएवस्यात॥तस्याहुतयः
सर्वाअपि पाचकाग्नयेदत्तानींधनानीवनप्रयोजनाय
भवेयुः॥इदमेवाहसइद्देवेषुगच्छतीति॥कथमध्वरो
यज्ञः॥हिंसारहितत्वादेव॥नित्येऽग्निहोत्रेनकामपि
हिंसांपश्यामः॥यज्ञश्चनित्यादग्निहोत्रान्नातिरिच्यते॥
ननुज्योतिष्टोमादयश्चयज्ञाउच्यंते॥तेऽप्यध्वराइत्या
ह॥तत्रध्वरश्चैवैधत्वान्नध्वरः॥तथापियज्ञस्याध्वरसंज्ञा
कथमुपपद्यतइतिचेत॥यत्रध्वरोध्वरोनेत्यावृत्तिंकुर्मः॥
परस्त्वाह॥ज्योतिष्टोमादयश्चभवंतुयज्ञाः॥भवंतुचा
ध्वराः॥वैधध्वरव्याख्यायांतुवयंभिधामहे॥येमांसभुजस्ता
नेवसध्वरविधिःसाक्षात्स्पृशति॥सच नियमाय॥यदि
मांसमश्नातिदेवेभ्यःसमर्प्यहुतशेषमश्नीयादिति॥
एतेनपितृभ्योमांसार्पणविधिश्चव्याख्यातः॥"देवान्पितॄं
[illegible]त्समभ्यर्च्यखादन्मांसंनदोषभाक्॥इतिस्मृतिश्चैतमे
वार्थंस्पष्टीकरोति॥यःसर्वथानिवृत्तमांसस्तमयंविधिर्न
स्पृशति॥ऋतौभार्यामुपेयादितिविधिर्नहिवानप्रस्थंबाध
ते॥ननुहिंसानिवृत्तिमात्रफलश्चेज्ज्योतिष्टोमादि
निवृत्तमांसानाम॥न॥नवयंविधि पानिवर्त्तये ज्यो

दिरिति ॥ तत्रमांसाहुतिरेवहिंसानिवृत्ति [illegible]

विनामांसाहुतिंकरोतुयज्ञंनिवृत्तमांसः ॥ यथामांसापि [illegible] वे

नाश्राध्यं ॥ नन्वेवंप्राचांकल्पोऽनादृतःस्यात ॥ न ॥ अस्तिह्यु

पायः ॥ यथाप्राचांकल्प आदृतःस्यात ॥ यथाचयागेहिसमां

सोनस्यात् ॥ सकः ॥ पिष्टेनकल्पितःपशुः ॥ अस्तिचकेषां

चिच्छिष्टानामेष आचारः ॥ ४ ॥

॥ अथेयंपंचमीभवति ॥

५ ऋ ॥ अग्निर्होताकविक्रतुःसत्यश्चित्रश्रवस्तमः ॥

देवोदेवेभिरागमत ॥

भा ॥ होता ॥ कविक्रतुः क्रांतप्रज्ञः ॥ सत्यः कालत्रयेप्यबाध्यः ॥

चित्रश्रवस्तमोतिशयेनचित्रकीर्तिः ॥ अग्निर्देवः ॥ देवेभिः

देवैःसह ॥ आगमदागच्छतु ॥ ५ ॥

॥ अथेयंषष्ठीभवति ॥

६ ऋ ॥ यदंगदाशुषेत्वमग्नेभद्रंकरिष्यसि ॥

तवेत्तत्सत्यमंगिरः ॥

भा ॥ अंग भोः ॥ अग्ने ॥ दाशुषेहविर्दत्तवतेभक्ताय ॥ त्वं ॥ य

त ॥ भद्रं मंगलं ॥ करिष्यसि ॥ तन्मंगलं ॥ हेअंगिरः ॥ तवेत्तवै

व ॥ सत्यमवितथं ॥ तवानुग्रहात्संपन्नोभूत्वायजमानोभू-

त्वा यजमानो भूयस्तुभ्यमेवस्तुभ्यमेवं दद्यादितियावत ॥
अनुग्रहप्राप्तासंपदपात्रेषुविनियुक्तानस्यादितिमंत्रहृद
यं ॥ कथमंगिरा अग्निः ॥ यंदगानांरसस्तंदगिरा अग्निरि
त्येके ॥ यदयमग्निरंगिरानामऋषिरभूत्तदस्यांगिरस्त्व
मितिपरे ॥ सर्वोतरस्यांगिरस्त्वमितिकोऽयंसंकोचइति
चेत ॥ आदावंगिरसोविद्वानात्मनास्वरूपभूत्वेनात्तुभू
त इत्ययंवैश्वानरोंगि अभिहितः ॥ अत्र "त्वमग्नेप्रथमो
अंगिराऋषिरित्यन्यत्रनिगमश्च भवति ॥ ६ ॥

॥ अथेमसप्तम्यष्टम्यौभवतः ॥

७ ऋ ॥ उपत्वाग्नेदिवेदिवेदोषावस्तर्धियावयं ॥
नमोभरंतएमसि ॥

८ ऋ ॥ राजंतमध्वराणांगोपामृतस्यदीदिविम ॥
वर्धमानंस्वेदमे ॥

भा ॥ हे अग्ने ॥ राजंतंभासमानं ॥ अध्वराणांयज्ञानां ॥
गोपां रक्षकं ॥ ऋतस्यसत्यस्य ॥ दीदिविंप्रकाशकं ॥ स्वे
स्वकीये ॥ दमे गृहे ॥ वर्धमानंहविःसमिदाज्यादिभिः
[illegible]र्वर्धमानत्वेन पुष्टिंयांतं ॥ त्वा त्वाम ॥ दोषावस्तःसायं
[illegible]वं[illegible] ॥ नमोन्नम ॥ भरंतोधारयंतः ॥ धियामंत्रेण

उपमास[illegible]पगच्छामा[illegible] एवमृषिः स्वस्य

[illegible]वदति ॥ ऋषीणामाचारश्चास्माकं प्रमाणं ॥ त

स्मात्सायंप्रातरग्निरूपा[illegible]सितव्य[illegible]स्तेनयोऽस्यानुग्र

हमिच्छतीत्युक्तं भवति ॥ ७ ॥ ८ ॥

॥ अथेयं नवमी भवति ॥

१ ऋ ॥ स नः पितेव सूनवेऽग्ने सूपायनो भव ॥
सचस्वा नः स्वस्तये ॥

भा ॥ हे अग्ने ॥ सः ॥ त्वं ॥ नोऽस्मभ्यं ॥ सूनवे पुत्राय ॥ पितेव ॥ सूपायनः शोभनोपायनः ॥ भव ॥ शोभनान्युपायनानि देहीत्यर्थः ॥ नः अस्माकं ॥ स्वस्तये ॥ सचस्व ॥ समवेतो भव समवेतो भव ॥ ९.५

इति श्रीभगवन्महर्षिरमणान्तेवासिनो वासिष्ठस्य नरसिंहसूनोर्गणपतेः कृतिरग्निमीळेसूक्तभाष्यं समाप्तं ॥

॥ गणपतेर्ग्रन्थमालायामष्टविंशं ॥